# राष्ट्रियसंस्कृतविद्यापीठम् :: तिरुपतिः

## RASHTRIYA SANSKRIT VIDYAPEETHA :: TIRUPATI

(विश्वविद्यालयानुदानायोगस्य १ ९ ५ ६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः)
(University established under section 3 of UGC Act, 1956)
(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ए श्रेण्या पुनर्मानितः)
(Re-accredited at 'A' Level by NAAC)

प्रधानपोषकः
Chief Patron
आचार्यः वि.मुरलीधर शर्मा
कुलपतिः
Prof. V. Muralidhara Sharma
Vice-Chancellor

अध्यक्षः
President
आचार्यः एम्.एल्.नरसिंहमूर्तिः
Prof. M.L.N.Murthy

उपाध्यक्षः
Vice-President
आचार्यः जा. रामकृष्णः
Prof. J.Ramakrishna

समायोजकाः
Co-ordinators

आचार्यः ओ.श्रीरामलाल शर्मा
Prof. O.Sriramalala Sarma
Ph: 09393620633

आचार्यःजी.एस्.आर्.कृष्णमूर्तिः
Prof. G.S.R.Krishna Murthy
Ph: 09441408796

डा. के. गणपति भट्टः
Dr. K.Ganapathi Bhat
Ph: 09440773072

डा. के. विश्वनाथः
Dr. K.Viswanatha
Ph: 09849428638

अतिरिक्तसमायोजकाः
Addnl. Co-ordinators
डा. नारायणाचार्
Dr. Narayanachar
Ph: 09490077161

डा. ओ.जी.पि.कल्याणशास्त्री
Dr. O.G.P.Kalyana Sastry
Ph: 08885673667

श्री. यशस्वी
Sri Yashaswee
Ph: 09441451900

## अखिलभारतीयशास्त्रार्थप्रशिक्षणवर्गः-२०१७
## ALL INDIA SASTRARTHA TRAINING CAMP-2017

दिनाङ्कः - १-५-२०१७

**अयि भोः मान्याः !**

राष्ट्रियसंस्कृतविद्यापीठेन संस्कृतशास्त्रच्छात्रोपकाराय **शास्त्रार्थप्रशिक्षिणवर्गः** अस्य संवत्सरस्य मे मासस्य ३१ दिनाङ्कात् आरभ्य जून् मासस्य १५ दिनाङ्कपर्यन्तं सञ्चालयिष्यते इति अस्माभिः पूर्वं प्रेषितेन पत्रेण भवन्तः विदन्ति एव। अयं **शास्त्रार्थप्रशिक्षणवर्गः** सप्तसु विषयेषु चाल्यते इति तत्र स्पष्टमेव।

**अस्मिन् शास्त्रार्थप्रशिक्षणवर्गे भागं ग्रहीतुम् अर्हाः -**

१. आचार्यकक्ष्या उत तत्समानकक्ष्यायां द्वितीयवर्षीयाः (आचार्यप्रथमवर्षपरीक्षां लिखितवन्तः छात्राः)।

२. विशिष्टाचार्यकक्ष्या तत्समानकक्षाः वा (M.Phil Scholars)

३. शोधच्छात्राः (Research Scholars)

छात्रैः **शास्त्रार्थप्रशिक्षणवर्गे** भागं ग्रहीतुम् अभ्यर्थनपत्रं स्वसंस्थया प्रेषणीयम्। (अभ्यर्थनपत्रम् अस्य पत्रस्य अन्ते संलग्नमस्ति। तद्रीत्यायैव अभ्यर्थनपत्रम् प्रेषणीयम्)

**अभ्यर्थनपत्रस्वीकरणस्य अन्तिमः दिनाङ्कः मे मासस्य २० दिनाङ्कः (20th-May-2017)**

एतेषां छात्राणाम् अर्हतापरीक्षाद्वारा **शास्त्रार्थप्रशिक्षणवर्गे** प्रवेशः लभ्यते।

**अर्हतापरीक्षा**

- अर्हतापरीक्षा मे मासस्य ३० दिनाङ्के भविष्यति।
- अस्यां परीक्षायां द्वौ भागौ स्तः।
- लेखनभागे एकाङ्कप्रश्नाः १०, पञ्चाङ्कप्रश्नाः ३ इति रीत्या आहत्य २५ अङ्कानां पत्रं भवति ।
- लेखनपरीक्षा तिरुपतिस्थ राष्ट्रियसंस्कृतविद्यापीठे शिक्षाभवने ३० दिनाङ्के प्रातः भवति।
- लेखनपरीक्षायाः समयः एकघण्टा।

◆ छात्रैः लेखनपरीक्षार्थं ९:०० समये उपस्थितैः भाव्यम्।

◆ ९:३० वादने परीक्षाप्रारम्भः १०:३० वादने समाप्तिः भवति।

◆ लेखनपरीक्षायां उत्तीर्णानाम् एव मौखिकपरीक्षायां प्रवेशः भवति।

◆ मौखिकपरीक्षा मध्याह्ने ३ वादने भविष्यति। मौखिकपरीक्षायां २५ अङ्कानां प्रश्नाः भवन्ति।

◆ लेखनपरीक्षायां मौखिकपरीक्षायां च छात्राणां शब्दसाधुत्वं, वाक्यनिर्माणकौशलम् , **स्वविषये प्राथमिकज्ञानम्** इतीमे विषयाः प्रधानतः परीक्ष्यन्ते।

अर्हतापरीक्षायाम् उत्तीर्णानां छात्राणां **शास्त्रार्थप्रशिक्षणवर्गे** प्रवेशः कल्प्यते। एवं प्रविष्टानां छात्राणाम् आवास-भोजनादिव्यवस्था विद्यापीठेन यथासम्प्रदायं कल्पयिष्यते। रु. २०० (द्विशतं रूप्यकाणि) एकैकस्मिन् दिने छात्रवृत्तिश्च प्रदीयते। **स्त्रीछात्राणां पृथक् रक्षितवासादिव्यवस्था कल्पयिष्यते।**

अर्हतापरीक्षायाम् अनुत्तीर्णानाम् अपि छात्राणां तेषां श्रद्धां पुरस्कृत्य अभ्यर्थनेन विशिष्टानुमत्या श्रवणादौ प्रवेशः अनुमन्यते। एतादृशानां छात्राणां भोजनादिव्यवस्था, छात्रवृत्तिः वा न भवतः। नात्र विवादस्य अवकाशः।

**प्रविष्टानां छात्राणां नियमाः -**

❍ छात्रैः सर्वैः अपि सर्वेषु दिनेषु अवस्थातव्यम्।

❍ सर्वेषु पाठेषु सश्रद्धं भागः ग्राह्यः।

❍ दैनन्दिनी/समयसारिणी सम्यक् अनुसर्तव्या।

❍ अध्यापकेषु विनयेन वर्तितव्यम्।

❍ साम्प्रदायिकवस्त्रधारणम् अवश्यं कर्तव्यम्।

❍ नियमपालनम् अवश्यं कर्तव्यम्।

❍ शास्त्रार्थप्रशिक्षणवर्गे भागग्राहिभिः सर्वैः छात्रैः अवश्यं स्वीया वाक्यार्थकरणप्रतिभा प्रदर्शनीया एव भवति।

❍ शास्त्रार्थप्रशिक्षणवर्गस्य अन्ते ५० अङ्कानां लेखनपरीक्षा भवति। अस्यां परीक्षायां छात्रैः उत्तीर्णता सम्पाद्या।

**समायोजकः**

**आचार्यः ओ. श्रीरामलालशर्मा**

# राष्ट्रियसंस्कृतविद्यापीठम् :: तिरुपतिः (आं.प्र.)

## अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः - २०१७

### *समयसारिणी*

---

| | |
|---|---|
| उत्थानं - कालकृत्यानि | प्रातः ५.०० - ६.३० |
| योगाभ्यासः - प्राणायामः | प्रातः ६.३० - ७.१५ |
| अल्पाहारः | प्रातः ७.१५ - ७.४५ |
| प्रार्थना | प्रातः ८.०० -८.१५ |
| पाठः | प्रातः ८.३० - ९.४५ |
| पानीयम् | प्रातः ९.४५ - १०.०० |
| पुनः पाठः | प्रातः१०.०० - ११.१५ |
| आदर्श वाक्यार्थः | प्रातः ११.३० - १२.३० |
| भोजनविरामः | मध्याह्ने १२.३० - २.३० |
| पाठः | अपराह्ने २.३० - ३.४५ |
| पानीयम्/लघुविरामः | अपराह्ने ३.४५ -४.०० |
| पुनः पाठः | अपराह्ने ४.०० - ५.३० |
| सायं विरामः | सायं ५.३० - ६.०० |
| पुनश्चरणम् /वाक्यार्थाभ्यासः/<br>शैक्षिक - सांस्कृतिकस्पर्धाः | सायं ६.०० - ८.३० |
| रात्रिभोजनविरामः | रात्रौ ८.३० - ९.०० |
| लेखनाद्यभ्यासः | रात्रौ ९.०० - १०.०० |
| निद्रा | रात्रौ १०.०० |

# राष्ट्रियसंस्कृतविद्यापीठम् :: तिरुपतिः (आं.प्र.)

## अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः - २०१७

### *अभ्यर्थनपत्रम्*

नाम :

वयः/जन्मतिथिः :

लिङ्गम् :

पितुः/मातुः नाम :

कक्ष्या - विषयः :

संस्था (यत्र अध्ययनं चलति) :

संस्थायाः सङ्केतः :

स्वस्य दूरध्वनिक्रमाङ्कः :

स्वस्य E-mail Id :

शास्त्रार्थप्रशिक्षणवर्गे चितः विषयः :

Affix

Passport Size

Photo

अहम् उपरि निर्दिष्टाः अंशाः सर्वे सत्याः इति प्रमाणयामि। शास्त्रार्थप्रशिक्षणवर्गे चितः चेत् तत्र सर्वान् नियमान् पालयामि इति प्रतिजाने। वर्गे अस्मिन् प्रवेशं कल्पयितुम् अभ्यर्थये।

छात्रस्य हस्ताक्षरम्

अयं ................................ नामा छात्रः अस्माकं ............................ विद्यालये/संस्थायां ..............................कक्ष्यायाम् अधीयानः छात्रः इति प्रमाणयामि। अखिलभारतशास्त्रार्थप्रशिक्षणवर्गे अस्य प्रवेशः कल्पनीयः इति अनुरुन्धे।

दिनाङ्कः : विद्यालयस्य/संस्थायाः अधिकारिणः हस्ताक्षरम्

स्थानम् : मुद्रा

◆ पत्रप्रेषणाय अन्तिमदिनाङ्कः **May 20, 2017** ◆ पूरितानि पत्राणि छात्राः scan कृत्वा **rsvp.aistc@gmail.com** इति सङ्केते प्रेषयितुं शक्नुवन्ति, परन्तु अर्हतापरीक्षादिने Originals अवश्यम् अनेतव्यानि। ◆ असंपूर्णपत्राणि नानुमन्यन्ते।

◆ अखिलभारतशास्त्रार्थप्रशिक्षणवर्गे प्रवेशानुमतिदाने सर्वेऽपि अधिकाराः विद्यापीठाधीनाः ◆ पूरितानां पत्राणां प्रेषणाय संङ्केतः -
**The Coordinator, All India Sastrartha Training Camp - 2017, Rashtriya Sanskrit Vidyapeetha, Tirupati - 517507.**